श्री चंद्रमौळीश्वर वर्णमाला स्तोत्रं

श्री चंद्रमौळीश्वर वर्णमाला स्तोत्रं

श्रीशात्मभूमुख्यसुरार्चितांघ्रिं
श्रीकंठशर्वादिपदाभिधेयं |
श्रीशंकराचार्यहृदब्जवासं
श्रीचंद्रमौलीशमहं नमामि || 1

चंडांशुशीतांशुकृशानुनेत्रं
चंडीशमुख्यप्रमथेड्यपादं |
षडास्यनागास्यसुशोभिपार्श्वं
श्रीचंद्रमौलीशमहं नमामि || 2

द्रव्यादिसृष्टिस्थितिनाशहेतुं
रव्यादितेजांस्यपि भासयंतं |
पव्यायुधादिस्तुतवैभवं तं
श्रीचंद्रमौलीशमहं नमामि || 3

मौलिस्फुरज्जह्नुसुतासितांशुं
व्यालेशसंवेष्टितपाणिपादं |
शूलादिनानायुधशोभमानं
श्रीचंद्रमौलीशमहं नमामि || 4

लीलाविनिर्धूतकृतांतदर्पं
शैलात्मजासंश्रितवामभागं |
शूलाग्रनिर्भिन्नसुरारिसंघं
श्रीचंद्रमौलीशमहं नमामि || 5

शतैः श्रुतीनां परिगीयमानं
यतैर्मुनींद्रैः परिसेव्यमानं |
नतैः सुरेंद्रैरभिपूज्यमानं
श्रीचंद्रमौलीशमहं नमामि || 6

मत्तेभकृत्या परिशोभितांगं
चित्ते यतीनां सततं वसंतं |
वित्तेशमुख्यैः परिवेष्टितं तं
श्रीचंद्रमौलीशमहं नमामि || 7

हंसोत्तमैश्चेतसि चिंत्यमानं
संसारपाथोनिधिकर्णधारं |
तं सामगानप्रियमष्टमूर्तिं
श्रीचंद्रमौलीशमहं नमामि || 8

नताघहं नित्यचिदेकरूपं
सतां गतिं सत्यसुखस्वरूपं |
हतांधकं ह्यद्यपराक्रमं तं
श्रीचंद्रमौलीशमहं नमामि || 9

मायातिगं वीतभयं विनिद्रं
मोहांतकं मृत्युहरं महेशं |
फालानलं नीलगलं कृपालुं
श्रीचंद्रमौलीशमहं नमामि || 10

मित्रं हि यस्याखिलशेवधीशः
पुत्रश्च विघ्नौघविभेददक्षः |
पात्रं कृपायाश्च समस्तलोकः
श्रीचंद्रमौलीशमहं नमामि || 11

इति श्री चंद्रमौळीश्वर वर्णमाला स्तोत्रं ||